## १ .२ समानाधिकरण:। (तत्पुरुषेषु द्वितीय: उपप्रकार:।)

अधिकरणम् इत्युक्ते विभक्ति:।

अत: समाना विभक्ति: यस्य स: समानाधिकरण:।

तस्मात् पूर्वोत्तरपदयो: विभक्ति: अत्र समाना अस्ति।

समानाधिकरण: समास: द्विविध:।

१. कर्मधारय:।

२. द्विगु:।

## १.२.१ कर्मधारयः।

अस्मिन् समासे पूर्वोत्तरपदयोः समाना विभक्तिः भवति।

अत्र द्वे स्थिती भवितुम् अर्हतः।

$\Rightarrow$ पूर्वपदे विशेषणपदम् उत्तरपदे च विशेष्यपदम्।

अथवा

$\Rightarrow$ पूर्वपदे उपमानपदम् उत्तरपदे च उपमेयपदम्।

अतः कर्मधारयसमासः द्विविधः।

१. विशेषणविशेष्यः।

२. उपमानोपमेयः।

## १.२.१.१. विशेषणविशेष्यः।

→ विशेषण इत्युक्ते adjective.

→ विशेष्य इत्युक्ते यस्य वर्णनं विशेषणेन क्रियते तत् noun.

यथा — चतुरः बालकः = चतुरबालकः।

विशेषणपदम्          विश्येष्यपदम्

अस्य समासस्य वैशिष्ट्यानि —

पूर्वोत्तरयोः पदयोः विभक्तिः समाना अस्ति।

समासकार्ये पूर्वोत्तरयोः पदयोः मध्ये ‘च’ इति अव्ययपदं तथा तदनन्तरं पूर्वोत्तरपदयोः अनुरूपं सर्वनामपदं भवति।

यथा — शुभ्रः च सः अश्वः = शुभ्राश्वः। शुभ्रश्च सोऽश्वः।

शुभ्रा च सा भित्तिका = शुभ्रभित्तिका।

शुभ्रं च तत् दुग्धम् = शुभ्रवस्त्रम्। शुभ्रञ्च तद्दुग्धम्।

*(सप्त पङ्क्तयः त्यक्तव्याः।)*

जीर्णः च सः वृक्षः = जीर्णवृक्षः। जीर्णश्च स वृक्षः।

जीर्णा च सा वाटिका = जीर्णवाटिका।

जीर्णं च तत् वस्त्रम् = जीर्णवस्त्रम्। जीर्णञ्च तद्वस्त्रम्।

*(सप्त पङ्क्तयः त्यक्तव्याः।)*

वृद्धः च सः मनुष्यः = वृद्धमनुष्यः। वृद्धश्च स मनुष्यः।

वृद्धा च सा नारी = वृद्धनारी।

वृद्धं च तत् फलम् = वृद्धफलम्। वृद्धञ्च तत्फलम्।

*(सप्त पङ्क्तय: त्यक्तव्या:।)*

एकवचने अदस् इति सर्वनाम्न: अपि उपयोगं भवति प्रायश:।

महान् च असौ पुरुष: = महापुरुष:।

महती च असौ नदी = महानदी।

महत् च अद: जलम् = महाजलम्।

अन्योदाहरणानि — *(अन्यानि च तानि उदाहरणानि)*

कृष्ण: च असौ सर्प: = कृष्णसर्प:।

कृष्णश्चासावुरग: = कृष्णोरग:। *(काला साँप)*

नीलं च तत् उत्पलम् = नीलोत्पलम्।

रक्तं च तत् उत्तपलम् = रक्तोत्पलम्।

सरला च सा भाषा = सरलभाषा। (टाप् प्रत्ययस्य लोप:।)

दृढौ च तौ हस्तौ = दृढहस्तौ।

गुरुः च असौ पाषाणः = गुरुपाषाणः।

१.२.१.२. उपमानोपमेयः — *(उपमान + उपमेय)*

उपमा इति भाषिकः च असौ अलङ्कारः अस्ति। ( भाषिकालङ्कारः)

उपमाया लक्षणम् — साधर्म्यम् उपमा भेदे।

अर्थात् द्वयोः भिन्नपदयोः समानता उपमा इति उच्यते।

यथा —

— बालिकायाः कमलम् इव नेत्रे अश्रुपूरिताः अभवन्।

अत्र नेत्रयोः कमले च समानता कविना निर्दिष्टा अस्ति।

= बालिकायाः कमलनेत्रे अश्रुपूरिताः अभवन्।

— लक्ष्मणः दुग्धम् इव धवलः आसीत्।

अत्र लक्ष्मणस्य धवलता दुग्धेन समाना अस्ति।

= लक्ष्मण: दुग्धधवल: आसीत्।

— सरदार् पटेल् लोहम् इव पुरुष: असीत्।

= सरदार् पटेल् लोहपुरुष: आसीत्।

— विद्या एव धनं सर्वेषु धनेषु श्रेष्ठम् अस्ति।

= विद्याधनं सर्वेषु धनेषु श्रेष्ठम् अस्ति।

— कृष्णस्य वर्ण: मेघ: इव श्याम: अस्ति।

= कृष्णस्य वर्ण: मेघश्याम: अस्ति।

— तस्य वर्ण: घन: इव श्यम: अपि अस्ति।

= तस्य वर्णः घनश्यामः अपि अस्ति।

१.२.२. द्विगुः। .... संख्यापूर्वो द्विगुः।

लक्षणानि —

— पूर्वपदे संख्याशब्दः अस्ति।

नवरत्नम्

— समस्तशब्दः प्रायः नपुंसकलिङ्गे एकवचने च भवति। (परन्तु कुत्रचित् अपवादः अपि दृष्यते।)

नवरत्नम्

— विग्रहे पूर्वोत्तरपदयोः षष्ठीविभक्तिः। अन्ते समाहारः इति शब्दः।

नवानां रत्नानां समाहारः।

— (पूर्वपदम् + षष्ठी) (उत्तरपदम् + षष्ठी) समाहारः

अन्यानि उदाहरणानि —

| | | |
|---|---|---|
| त्रिभुवनम् | — | त्रयाणां भुवनानां समाहारः। |
| नवग्रहम् | — | नवानां ग्रहाणां समाहारः। |
| सप्ताहम् | — | सप्तानां अह्नां समाहारः। |
| पञ्चधेनु | — | पञ्चानां धेनूनां समाहारः। |
| पञ्चमुनि | — | पञ्चानां मुनीनां समाहारः। |
| सप्तशती | — | सप्तानां शतानां समाहारः। |
| अष्टाध्यायी | — | अष्टानाम् अध्यायानां समाहारः। |
| शताब्दी | — | शतस्य/शतानाम् अब्दानां समाहारः। |
| पञ्चखट्वा | — | पञ्चानां खट्वानां समाहारः। |
| द्विहस्तम् | — | द्वयोः हस्तयोः समाहारः। |

द्विरात्रम् — द्वयोः रात्र्योः समाहारः।